द्रामास बभूव चकार दद्रिद्र दद्रिद्रौ इत्येके । दरिद्रिता दरिद्र्यात् । दरिद्रिष्यति । दरिद्राणः । सनि । दिदरिद्रिषति दिदरिद्रासति । [शीले च ।

**दरिन्** त्रि॰ दॄ–भये विदारे वा इनि । १भीरौ २विदारण-

**दरोदर** पु॰ दुरोदर+पृषो॰ । पाशके "आश्रित्य दुर्गं गिरिकन्दरोदरं क्रीडन्नसुष्मिन् सततं दरोदरम्" "यमकात् दरोदरो निरुकारः इति गोवर्द्धनः" उज्ज्वलद॰

**दर्तृ** त्रि॰ दॄ–विदारे वेदे इडभावः । दारयितरि "स व्रजं दर्त्ता पार्ये अध द्योः" ऋ॰ ६।६६।८ । "दर्त्ता दारयिता" भा॰ । लोके तु दरी(रि)ता इत्येव ।

**दर्त्नु** पु॰ दॄ–विदारे वा॰ त्नु इडभावश्छान्दसः । दारके । "यत् पुरां दर्त्नुमावत्" ऋ॰ ६।२०।३ "दर्त्नुं दारकम्" भा॰

**दर्दर** पु॰ दॄ–यङ् अच् पृषो॰ । १पर्वते । २ईषद्भग्नभाजने च मेदि॰ ।

**दर्दराट्ट** न॰ व्यञ्जनभेदे शब्दच॰ ।

**दर्दरीक** न॰ दॄ–विदारे फर्फरीका॰ नि॰ । १वाद्यभेदे ।

**दर्दुर** न॰ दृणाति कर्णौ शब्देन उरच् नि॰ । १भेके २मेघे ३वाद्यभेदे ४पर्वतभेदे "शैलस्य दर्दुरपुटानिव वादयन्तः" माघः "कौषेयं तित्तिरिर्हृत्वा क्षौमं हृत्वा तु दर्दुरः" मनुः "स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ" रघुः । "हिमवान् पारिपात्रश्च विन्ध्यकैलासमन्दराः । मलयो दर्दुरश्चैव महेन्द्रो गन्धमादनः" भा॰ स॰ १० अ॰ । "निर्याय तस्मादुद्देशात् पश्यामो लवणाम्भसः । समीपे सह्यमलयौ दर्दुरञ्च महागिरिम्" भा॰ व॰ २८१ अ॰ । "मलयात् दर्दुराच्चैव चन्दनागुरुसञ्चयान्" ५१ अ॰ । दर्दुरः पर्वतः सन्निकृष्टतयास्त्यस्य अच् । ५तत्सन्निकृष्टे देशभेदे च । स च देशः "अथ दक्षिणेन लङ्का" इत्युपक्रमे "गिरिनगरवनादर्दुरमहेन्द्रमालिन्द्यभरुकच्छाः" वृ॰ सं॰ १४॰अ॰ दक्षिणस्यामुक्तः । ६राक्षसभेदे संक्षिप्तसारः । ७चण्डिकायां स्त्री मेदि॰ ।

**दर्दुरक** पु॰ दर्दुराय कायति दर्दुर इव कायति शब्दायते वा कै–क । १वाद्यभेदे शब्देन मेघसूचके २भेके । स्वार्थे क । ३दर्दुरशब्दार्थे । [रत्नकरनिघण्टुः ।

**दर्दुरच्छदा** स्त्री दर्दुर इव छदो यस्याः । ब्राह्म्यां पा-

**दद्रु(द्रू)** पु॰ दरिद्रा–दरिद्रातेर्यालोपश्च" उणा॰ कु उवा इकाराकारयोर्लोपः" उज्ज्वलदत्तः । १दद्रुरोगे भोजदेवशब्दानुशासने तु "दरिद्रातेर्यालोपश्चेति तिपानिर्देशात् रिश्च आश्चेति संहितापाठेर्यशब्दलोपे दद्रु'रित्यपि साधितम् । तथा रश्च इश्च आश्चेत्यन्यसदेशद्वितीयरेफलोपेन दर्दुरित्यपि साधितम् । एवञ्च रूपचतुष्टयमिति । सि॰ कौ॰ ।

**दद्रु(द्रू)घ्न** पु॰ दद्रुं(द्रूं) हन्ति हन–टक् । चक्रमर्द्दके शब्दर॰ ।

**दद्रु(द्रू)नाशिनी** स्त्री दद्रुं(द्रूं) नाशयति नश–णिच् णिनि ङीप् । तैलिनीवृक्षे राजनि॰ ।

**दर्प** पु॰ दृप–भावे घञ् कर्त्तरि अच् वा । १अहङ्कारे पराकधीरणाहेतौ गुरुनृपाद्यतिक्रामके २चित्तवृत्तिभेदे । गर्वभेदे ३हर्षजन्यगर्वे ४मृगमदे मेदि॰ । ५ऊष्मणि त्रिका॰ । ६उच्छृङ्खलत्वे ७धर्म्ममर्य्यादातिक्रमे नीलकण्ठः दर्पलक्षणविषयभेदादिकं ब्रह्मवै॰ जन्मख॰ उक्तं यथा "अहङ्कारश्च सर्वेषां पापबीजममङ्गलम् । ब्रह्माण्डेषु च सर्वेषां गर्वपर्य्यन्तमुन्नतिः । येषां येषां भवेद्दर्पो ब्रह्माण्डेषु परात्परे । विज्ञाय सर्वं सर्वात्मा तेषां शान्ताहमेव च । क्षुद्राणां महताञ्चैव येषां गर्वो भवेत् प्रिये! । एवंविधमहं तेषां चूर्णीभूतं करोमि च । चकार दर्पभङ्गञ्च महाविष्णोः पुरा विभुः । ब्रह्मणश्च तथा विष्णोः शेषस्य च शिवस्य च । धर्मस्य च यमस्यापि शाम्बस्य चन्द्रसूर्य्ययोः । गरुडस्य च वह्नेश्च गुरोर्दुर्वाससस्तथा । दौवारिकस्य भक्तस्य जयस्य विजयस्य च । सुराणामसुराणाञ्च भवतः कामशक्रयोः । लक्ष्मणस्यार्जुनस्यापि बाणस्य च भृगोस्तथा । सुमेरोश्च समुद्राणां वायोश्च वरुणस्य च । सरस्वत्याश्च दुर्गायाः पद्मायाश्च भुवस्तथा । सावित्र्याश्चैव गङ्गाया मनसायास्तथैव च । प्राणाधिष्ठातृदेव्याश्च प्रियायाः प्राणतोऽपि च । प्राणाधिकाया राधाया अन्येषामपि का कथा । हत्वा दर्पञ्च सर्वेषां प्रसादञ्च चकार सः" ।

८उत्साहे मल्लिना॰ "तेजो विहीनं विजहाति दर्पः" किरा॰ "दर्प उत्साहः" मल्लि॰ ।

**दर्पक** पु॰ दर्पयति दृप–हर्षमोहनयोः णिच्–ण्वुल् । मोहकारके १कन्दर्पे अमरः । २अहङ्कारमोहयोः कारके त्रि॰ ।

**दर्पण** पु॰ चु॰ दृप–सन्दीपने ल्यु । १आदर्शे (आयना) । मुकुरे अमरः २नेत्रे न॰ जटा॰ ३पर्वतभेदे ४नदभेदे च । "ततः पूर्वं महाराज! दर्पणो नाम पर्वतः । कुबेरो यत्र वसति धनपालैः समं सदेति । यस्मिन्नास्ते मध्यभागे रोहिणो रोहिताकृतिः । यस्मिन् लोहादिकं स्पृष्टं स्वर्णतां याति तत्क्षणात् । तस्मातिदूरे स्रवति दर्पणो नाम वै नदः । हिमाद्रिप्रभवो नित्यं लौहित्य